CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B

Coll. No. 638

Title Śārīraka mīmāṁsā Bhāṣya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 638 Subject: Vedānta.

Title: Śārīraka mīmaṁsā Bhāṣya.

Author: Śaṅkara Scribe: –

Date of the work: Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 11.1" by 4.9" Extent: 99 to 140 foll.

Language: Sanskrit Script: Devanāgarī

Remarks:

गा.री.ट ना [illegible] द्वितीयाध्याय पत्र

द्वि०

पि४

पा१

॥ ६०॥ ॐ॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्ति-
कारणं मृत्सुवर्णादय इव घटरुचकादीनां उत्पन्नस्य जगतो नियंतृत्वेन स्थितिकारणं मायावीव मायायाः प्रसारि- ति२
३ पुनः तस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणमवनिरिव चतुर्विधस्य भूतग्रामस्य स एव च सर्वेषां न आत्मेत्येतद्वेदांतवाक्यसमन्वयप्रति-
पादनेन प्रतिपादितं प्रधानादिकारणवादाश्चाशब्दत्वेन निराकृताः॥ इदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः प्रधानादिवादानां च
न्यायाभासोपबृंहितत्वं प्रतिवेदांतं च सृष्ट्यादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्वितीयोऽध्याय आरभ्य-
ते तत्र प्रथमं तावत्स्मृतिविरोधमुपन्यस्य परिहरति॥ यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति तदयुक्तं कुतः स्मृत्यनवकाशदो-
षप्रसंगात् स्मृतिश्च तंत्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता॥ अन्याश्च तदनुसारिण्यः स्मृतय एवं सत्यनवकाशाः प्रसज्येरन् ता-
सु ह्यचेतनं प्रधानं स्वतंत्रं जगतः कारणमुपनिबध्यते मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना धर्मजातेनापे-
क्षितमर्थं समर्पयंत्यः सावकाशा भवंति अस्य वर्णस्यास्मिन्काले अनेन विधानेनोपनयनं ईदृशश्चाचारः इत्थं वेदाध्ययनं इत्थं
सै समावर्तनं इत्थं सहधर्मचारिणीसंयोग इति तथा पुरुषार्थांश्च वर्णाश्रमधर्मान्नानाविधान्विदधति नैवं कपिलादिस्मृतीनाम-
नुष्ठेयविषयेऽवकाशोऽस्ति मोक्षसाधनमेव हि सम्यग्दर्शनमधिकृत्य ताः प्रणीताः यदि तत्राप्यनवकाशाः स्युः आनर्थक्यमेवासां
प्रसज्येत तस्मात्तदविरोधेन वेदांता व्याख्यातव्याः कथं पुनरीक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधा-
रितः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसंगेन पुनराक्षिप्यते भवेदयमनाक्षेपः स्वतंत्रप्रज्ञानां परतंत्रप्रज्ञास्तु प्रायेण जनाः स्वा-

तंत्र्येण श्रुत्यर्थमवधारयितुमशक्नुवंतः प्रख्यातप्रणेतृकासु स्मृतिष्ववलंबेरन् तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन् अस्मत्कृते च व्याख्या-
नेन विश्वस्युः बहुमानात्स्मृतीनां प्रणेतृषु कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते श्रुतिश्च भवति ऋषिं प्रसूतं कपिलं यस्त-
मग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदिति तस्मान्नैषां मतमयथार्थं शक्यं संभावयितुं तर्कावष्टंभेन चैतेऽर्थं प्रतिष्ठापयंति तस्मादपि
स्मृतिबलेन वेदांता व्याख्येया इति पुनराक्षेपः तस्य समाधिर्नान्यस्मृत्यनवकाशदोषप्रसंगादिति [illegible]
[illegible] यदि स्मृत्यनवकाशदोषप्रसंगेनेश्वरकारणवाद आक्षिप्येत एवमप्यन्या ईश्वरकारणवादिन्यः स्मृतयोऽनवकाशाः
प्रसज्येरन् ता उदाहरिष्यामः यत्तत्सूक्ष्ममविज्ञेयमिति परं ब्रह्म प्रकृत्य स ह्यंतरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते इति चोक्त्वा तस्माद-
व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेत्याह तथान्यत्रापि अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयत इत्याह अतश्च संक्षेपमिमं शृणुध्वं नारा-
यणः सर्वमिदं पुराणः स सर्गकाले च करोति सर्वं संहारकाले च तदत्ति भूय इति पुराणे भगवद्गीतासु च अहं कृत्स्नस्य जगतः
प्रभवः प्रलयस्तथेति परमात्मानमेव च प्रकृत्यापस्तंबः पठति तस्मात्कायाः प्रभवंति सर्वे स मूलं शाश्वतिकः स नित्य इत्येवमनेक-
४ह्रा शः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्यामीत्यतोऽयम-
न्यस्मृत्यनवकाशोपन्यासः दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यं विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरप-
रिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या इतरा तदुक्तं प्रमाणलक्षणे विरोधे त्वनपेक्षं स्याद-
सति ह्यनुमानमिति न चातींद्रियानर्थान् श्रुतिमंतरेण कश्चिदुपलभत इति शक्यं संभावयितुं निमित्ताभावात् शक्यं कपिला-

वि४
सू१

द्वि०
॥ ६०॥ ॥ स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्ति
कारणं मृत्सुवर्णादय इव घटरुचकादीनां उत्पन्नस्य जगतो नियंता स्थितिकारणं मायावीव मायायाः प्रसारि ति२
३ पुनः तस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणं अवनिरिव चतुर्विधस्य भूतग्रामस्य स एव च सर्वेषां न आत्मा इत्येतद्वेदान्तवाक्यसमन्वयप्रति
पादनेन प्रतिपादितं प्रधानादिकारणवादाश्चाशब्दत्वेन निराकृताः॥ इदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः प्रधानादिवादानां च
न्यायाभासोपबृंहितत्वं प्रतिवेदान्तं च सृष्ट्यादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्वितीयोऽध्याय आरभ्य
ते तत्र प्रथमं तावत्स्मृतिविरोधमुपन्यस्य परिहरति॥ यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति तदयुक्तं कुतः स्मृत्यनवकाशदो
षप्रसंगात् स्मृतिश्च तंत्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता॥ अन्याश्च तदनुसारिण्यः स्मृतय एवं सत्यनवकाशाः प्रसज्येरन् ता
सु ह्यचेतनं प्रधानं स्वतंत्रं जगतः कारणमुपनिबध्यते मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना धर्मजातेनाप
क्षितमर्थं समर्पयन्त्यः सावकाशा भवंति अस्य वर्णस्यास्मिन्काले ऽनेन विधानेनोपनयनं ईदृशश्चाचारः इत्थं वेदाध्ययनं इत्थं
सै समावर्त्तनं इत्थं सहधर्मचारिणीसंयोग इति तथा पुरुषार्थांश्च वर्णाश्रमधर्मान्नानाविधान्विदधति नैवं कपिलादिस्मृतीनाम
नुष्ठेयविषये ऽवकाशोऽस्ति मोक्षसाधनमेव हि सम्यग्दर्शनमधिकृत्य ताः प्रणीताः यदि तत्राप्यनवकाशाः स्युः आनर्थक्यमेवा शा:
सां प्रसज्येत तस्मात्तदविरोधेन वेदांता व्याख्यातव्याः कथं पुनरीक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधा ५५
रितः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसंगेन पुनराक्षिप्यते भवेदयमनाक्षेपः स्वतंत्रप्रज्ञानां परतंत्रप्रज्ञास्तु प्रायेण जनाः स्वा

तंत्र्येण श्रुत्यर्थमवधारयितुमशक्नुवंतः प्रख्यातप्रणेतृकासु स्मृतिष्ववलंबेरन् तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन् अस्मत्कृते च व्याख्या
नेन विश्वस्युर्बहुमानात्स्मृतीनां प्रणेतृषु कपिलप्रभृतीनां चार्षं ज्ञानमप्रतिहतं स्मर्यते श्रुतिश्च भवति ऋषिं प्रसूतं कपिलं यस्त
मग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदिति॥ तस्मान्नैषां मतमयथार्थं शक्यं संभावयितुं तर्कावष्टंभेन चैतेऽर्थं प्रतिष्ठापयंति॥ तस्मादपि
स्मृतिबलेन वेदांता व्याख्येया इति पुनराक्षेपः [illegible] नान्यस्मृत्यनवकाशदोषप्रसंगादिति [illegible]
[illegible]॥ यदि स्मृत्यनवकाशदोषप्रसंगेनेश्वरकारणवाद आक्षिप्येत एवमप्यन्या ईश्वरकारणवादिन्यः स्मृतयोऽनवकाशाः
प्रसज्येरन् ता उदाहरिष्यामः॥ यत्तत्सूक्ष्ममविज्ञेयमिति परं ब्रह्म प्रकृत्य स ह्यंतरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यत इति चोक्त्वा तस्माद
व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेत्याह तथान्यत्रापि अव्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयत इत्याह अतश्च संक्षेपमिमं शृणुध्वं नारा क्रि
यणः सर्वमिदं पुराणः स सर्गकाले च करोति सर्वं संहारकाले च तदत्ति भूय इति पुराणे॥ भगवद्गीतासु च अहं कृत्स्नस्य जगतः
प्रभवः प्रलयस्तथेति परमात्मानमेव च प्रकृत्यापस्तंबः पठति तस्मात्कायाः प्रभवंति सर्वे स मूलं शाश्वतिकः स नित्य इत्येवमनेक
४द्रा शः स्मृतिष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते॥ स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं वक्ष्यामीत्यतोऽयम
न्यस्मृत्यनवकाशोपन्यासः दर्शितं तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यं विप्रतिपत्तौ च स्मृतीनामवश्यकर्तव्येऽन्यतरप
रिग्रहेऽन्यतरपरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या इतरा तदुक्तं प्रमाणलक्षणे॥ विरोधे त्वनपेक्षं स्याद ५
सति ह्यनुमानमिति॥ न चातीन्द्रियानर्थान् श्रुतिमंतरेण कश्चिदुपलभत इति शक्यं संभावयितुं निमित्ताभावात् शक्यं कपिला

सू०१ सू० ६२

ज्ञानखादीनामुत्पत्तिः॥ अचेतनाच्चचेतनस्य सिद्धेर्गोमयादिभ्यो वृश्चिकादीनां न चेतनान्येव कृपादिशरीराण्यचेतनानां केश
नखादीनां कारणानि अचेतनान्येव वृश्चिकादिशरीराणि चेतनानां गोमयादीनां कार्याणीत्युच्यते एवमपि किंचिदचेतनं चेत
नस्यायतनत्वभावमुपगच्छति किंचिन्नेत्यस्त्येव वैलक्षण्यं महदाश्रयं प्राणिनामिकास्त्वचेतनाविशिष्टः कुरूपादीनां केशनखा
दीनां च रूपादिनैरादन्तथा गोमयादीनां वृश्चिकादीनां च भ्यञ्च्येतस्य व्यवस्थिते विकारस्तावदेव प्रलीयेत अत्यंतत्वे त्रिगुण
त्वार्थिवत्वादिस्वभावः कुरूपादीनां केशनखादिषु वर्तमानो गोमयादीनां वृश्चिकादिषु वर्तते ब्रह्मणोऽपि लक्षणं सत्तालक्षण
॥ स्वभाव आकाशादिषु वर्तमानो दृश्यते विलक्षणत्वे च कारणेन ब्रह्मप्रकृतिकत्वं जगतो दृश्यतां किमसौ धर्मो ब्रह्मस्वभा
वस्य भावस्यावर्तमाने विलक्षणत्वमभिप्रेयते उत यस्य कस्य चिदथ स्वितश्च स्येति विकल्पः प्रथमे विकल्पे समस्तप्रकृतिविकारो
च्छेदप्रसंगात् ब्रह्मसत्यतिशायप्रकृतिविकार इति न वक्तिं दितीये चासिद्धवत्वं दृश्यते हि सत्तालक्षणो ब्रह्मणः स्वभाव आकाशादिषु
वर्तमान[illegible]स्य इतीयलक्षणशून्यतासावः किंस्विद्यमेतन्येनानचितं तद्ब्रह्मप्रकृतिकं दृष्टमिति ब्रह्मवादिनं प्रत्युदाह्रियते समस्त
स्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात् आगमविरोधस्तु प्रसिद्ध एव चेतनं ब्रह्म जगतः कारणं प्रकृतिरित्यागमतात्पर्य
स्य प्रसाधितत्वात् यत्तूक्तं परिनिष्पन्नत्वाद्ब्रह्मणि प्रमाणान्तराणि संभवेयुरिति तदपि मनोरथमात्रं रूपाद्यभावाद्धि नायमर्थः प्रत्यक्ष २३
स्य गोचरः लिंगाद्यभावाच्च नानुमानादीनामागममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् तथा च श्रुतिः नैषा तर्केण मतिरापनेया १०३
प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति को अद्धा वेद क इह प्रवोचदियं विसृष्टिर्यत आबभूवेति चैते ऋचौ सिद्धानामपीश्वराणां दुर्बो

अकीं॥ प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्

धतां जगत्कारणं प्रदर्शयतः स्मृतिरपि भवति अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् इति अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते इ
ति न मे विदुः सुरगणाः प्रभवं न महर्षयः अहमादिर्हि देवानां महर्षीणां च सर्वशः इति चैवंजातीयका स्मृतिरपि श्रुत्यनुसारिणी आगमनी
नं विदधच्छत्र गतं तर्कमाद्धिद्याप्ते दर्शयती कतर्कोनानेन मन्त्रेणाभ्युदकत तर्कस्यापूर्णमात्रतान्तः संभवति श्रुत्यनुगृहीत एव ह्यत्र तर्को ऽनुभ
वांगत्वेनाश्रीयते स्वप्नांतबुद्धांतयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्वागतत्वं संप्रसादे च प्रपंचपरित्यागेन सदात्मना संपत्तेर्निः प्रपंच
सदात्मत्वं प्रपंचस्य ब्रह्मप्रभवत्वात्कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवंजातीयकः ॥ तर्काप्रतिष्ठानादिति च केवलस्य
तर्कस्य विप्रलंभकत्वं प्रदर्शयिष्यति यापि चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षेत तस्यापि विज्ञातं चाविज्ञानं
तिचेतनाचेतनविभागश्रवणं विभावनाविभावनाभ्यां चेतन्यस्य शक्यत एव योजयितुं परस्यैव त्विदमपि विभागश्रवणं न युज्यते कथं पर
मकारणस्य ह्यत्र समस्तजगदात्मना समवस्थानं श्राव्यते विज्ञानं चाविज्ञानं चाभवदिति तत्र यथा चेतनस्याचेतनभावो नोपपद्यते विल
क्षणत्वान्नैवमचेतनस्यापि चेतनभावो नोपपद्यते प्रत्युक्तत्वात्तु विलक्षणत्वस्य यथा श्रुत्यैव चेतनं कारणं ग्रहीतव्यं भवति॥ ॥असः॥
दितिचेन्न प्रतिषेधमात्रत्वात् यदि चेतनं शुद्धं शब्दादिहीनं च ब्रह्म तद्विपरीतस्याचेतनस्याशुद्धस्य शब्दादिमतश्च कार्यस्य कारणमि
ष्यते असत्कार्यं प्रसज्येत इति चेन्नैष दोषः प्रतिषेधमात्रत्वात् प्रतिषेधमात्रं हीदं
स्य प्रतिषेधस्य प्रतिषेध्यमस्तीन ह्ययं प्रतिषेधः प्रागुत्पत्तेः सत्त्वं कार्यस्य प्रतिषेद्धुं शक्नोति कथं यथैव हीदानीमिदं कार्यं कारणात्मना
त्मना सत्त्वं प्रागुत्पत्तेरिति गम्यते न हीदानीमिदं कार्यं कारणात्मानमन्तरेण स्वतंत्रमेवास्ति सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिश्रु

लोकेन द्विषयं ज्ञानं सम्यग्ज्ञानमिष्यते यथाग्निरूक्ष इति तन्नैवं सम्यग्ज्ञानेऽनुष्णत्वं विसंवादिरूपत्वात्तर्कज्ञानानां वाऽन्या
न विरोधात्तदप्रसिद्धा विशेषि [illegible] पत्तिः यदि केन चिन्नाक्कि कर्णादमेव सम्यग्ज्ञानमिति प्रतिष्ठितं तदयुक्तमप्यन्यतस्तत्रापि प्रसिद्धा
पितं तत्प्रामाण्यं स्यादिति प्रसिद्धे लोके कथं मेरुरूपेणावस्थितं विषयं तर्कस्य वस्तु सम्यग्ज्ञानं न तेन तमवधानवादी नर्कोविदा
कृतमपि इति मन्वानः किं किः परिगृहीतायेन्नदीयं मतं सम्यग्ज्ञानमिति न्यायेन तदेवांगतदज्ञानानागतवर्तमानानां किंच
षट्कथितान्यादेशकालवत्समादेतुल्यमनतमतिरेकस्य कार्यविषयात्संभवप्रतिरितिरूपान्नावदमनुमिष्यवे विज्ञानानन्निदं तद्येन
मतिमन्वस्थितार्थे विषयत्वोपपत्तेस्तज्ज्ञानितयस्त्वानस्यसम्यक्प्रतीतानागतव. शैवानैः सर्वैरपिता किं केरपक्षोऽनुमशक्यं ज्ञानस्थित
मस्यैवोपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वे ज्ञातो नात्र सम्यग्ज्ञानद्वातपपत्तेः संसारादिमोक्षपक्षवत्समभ्यस्तज्ञानागमवदेनागमाचस्या
रितर्कवशेनवचनं ब्रह्मजगतः कारणं प्रकृतिश्चेति स्थितं॥ ॥तेन शिष्टपरिगृहीता अपि व्याख्याताः वैदिकस्य दर्शनस्य प्रत्यास
न्नत्वाद् गुरुतरतर्कबलापेतत्वाद्वेदानुसारिभिश्च शिष्टैः केनचिदंशेन परिगृहीतत्वात् प्रधानकारणवादे तावदपाश्रित्य यस्तर्कनि
मित्त आक्षेपो वेदांतवाक्येषूद्भावितः स परिहृतः इदानीमण्वादिवादव्यपाश्रयेणापि कश्चिन्मंदमतिर्वेदांतवाक्येषु पुनस्तर्कनि
मित्तमाक्षेपमाशंक्यते ततः प्रधानमल्लनिबर्हणन्यायेनातिदिशति परिगृहीतत्वं न इति परिगृहीतं न इति परिग्रहा न परिग्रहा अपरिग्र
हाः शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः प्रधानप्रकृतेन प्रधानकारणवादनिराकरणेन शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदप्यंशे
नापरिगृहीता ये अण्वादिकारणवादास्तेपि प्रत्याख्याताः निराकृता द्रष्टव्याः तुल्यत्वान्निराकरणकारणस्य नात्र पुनराशंकितव्यं किं १०६

विरुद्धत्वमत्रापि प्रसंगतीस्य तद्गतकारणस्य तर्कोऽनवगाह्यत्वं तर्कस्याप्रतिहतं तथापि तुल्यत्वान्नेदं विमोक्षः आगमविरुद्धत्वं
चेत्तातीयकं निराकरणकारणं॥ ॥भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्॥ अन्यथा पुनर्ब्रह्मकारणवादस्तर्कबलेनेवाक्षि
प्यते यद्यपि श्रुतिः प्रमाणं स्वविषये भवति तथापि प्रमाणांतरेण विषयापहारेऽन्यपरा भवितुमर्हति यथा मंत्रार्थवादौ तत्कौपि
श्रुतिविषयादन्यत्रापि भवति स्यात् यथा धर्माधर्मयोः किं मतः यद्येवमतस्तदं प्रमाणांतरप्रसिद्धार्थबाधनं श्रुतेः कथं पुनः प्र
माणांतरप्रसिद्धार्थः श्रुत्या बाध्यत इति उच्यते प्रसिद्धो ह्ययं भोक्तृभोग्ययोर्विभागो लोके भोक्ता चेतनः शारीरो भोग्याः शब्दादयो
विषया इति यथा भोक्ता देवदत्तो भोज्य ओदन इति तस्य च विभागस्याभावः प्रसज्येत यदि भोक्ता भोग्यभावमापद्येत भोग्यं वा भोक्तृ
वमापद्येत तयोश्चेतरेतरभावापत्तिः परमकारणाद्ब्रह्मणोऽनन्यत्वात्प्रसज्येत न चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तं यथा त्वद्ये
भोक्तृभोग्ययोर्विभागो दृष्टः तथातीतानागतयोरपि कल्पयितव्यः तस्मात्प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसंगादयुक्त
मिदं ब्रह्मकारणतावधारणमिति चेत्कश्चिच्चोदयेत् तं प्रति ब्रूयात् स्याल्लोकवदिति उपपद्यत एवायमस्मत्पक्षेपि विभागः एवं लो
४न्न के दृष्टत्वात्तथाहि समुद्रादुदकात्मनोऽनन्यत्वेपि तद्विकाराणां फेनवीचीतरंगबुद्बुदादीनामितरेतरविभाग इतरेतरसंश्लेषादिलक्षण सं४
श्च व्यवहार उपलभ्यते न च समुद्रात्मनोऽनन्यत्वेपि फेनतरंगदीनामितरेतरभावापत्तिर्भवति न च तेषामितरेतरभावानापत्ता
वपि समुद्रात्मनोऽन्यत्वं भवति एवमिहापि न च भोक्तृभोग्ययोरितरेतरभावापत्तिर्न च परस्माद्ब्रह्मणोऽन्यत्वमिति नवि
भवितव्यमपि लोकाना ब्रह्मणो विकारः तत्स्रष्टा तदेवानुप्राविशदिति सृष्टस्यैवाविकृतस्य कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्

लभाव एव घट उपलभ्यते सत्यपि निमित्तनैमित्तिकभावेऽन्यत्वात् नन्वन्यस्य भावेऽप्यन्यस्योपलब्धिर्नियता दृश्यते यथाग्नेर्भा
वे धूमस्येति नेत्युच्यत उद्वापितेऽप्यग्नौ गोपालघटिकादिधारितस्य धूमस्य दृश्यमानत्वात् अथ धूमं कयाचिदवस्थया विशिंष्या
द् ईदृशो धूमो नासत्यग्नौ भवतीति नैवमपि कश्चिद्दोषः तद्भावानुरक्तां हि बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदामः न
चासावग्निधूमयोर्विद्यते भावाच्चोपलब्धेरिति वा सूत्रं तस्यार्थः न केवलं शब्दादेव कार्यकारणयोरनन्यत्वं प्रत्यक्षोपलब्धिभावाच्च
तयोरनन्यत्वमित्यर्थः भवति हि प्रत्यक्षोपलब्धिः कार्यकारणयोरनन्यत्वे तद्यथा तंतुसंस्थाने पटे तंतुव्यतिरेकेण पटो नाम। प५
कार्यं नैवोपलभ्यते केवलास्तु तंतव आतानवितानवंतः प्रत्यक्षमुपलभ्यंते तथा तंतुष्वंशवः अंशुषु तदवयवाः अनया प्र
त्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि ततो वायुमात्रमाकाशमात्रं चेत्यनुमेयं ततः परं ब्रह्मैकमेवाद्वि
तीयं तत्र सर्वप्रमाणानां निष्ठामवगच्छाम॥२३॥ ॥सत्त्वाच्चावरस्य॥ ॥इतश्च कारणात्कार्यस्यानन्यत्वं यत्कारणं प्रागुत्प
त्तेः कारणात्मनैव कारणे सत्त्वमवरकालीनस्य कार्यस्य श्रूयते सदेव सोम्येदमग्र आसीत् आत्मा वा इदमेक
एवाग्र आसीदित्यादौ इदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात् यच्च यदात्मना यत्र न वर्तते न तत्तत उत्प
द्यते यथा सिकताभ्यस्तैलं तस्मात्प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेव कारणात्कार्यमित्यवगम्यते यथा च कारणं ब्रह्म त्रि
षु कालेषु सत्त्वं न व्यभिचरति एवं कार्यं जगत्त्रिषु कालेषु सत्त्वं न व्यभिचरति एकं च पुनः सत्त्वं अतोऽप्यनन्यत्वं कारणात्का ११०
र्यस्य॥ ॥असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्॥ ननु क्वचिदसत्त्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति अस

देवेदमग्र आसीदिति असद्वा इदमग्र आसीदिति च तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्त्वमिति चेन्नेति ब्रूमः न ह्ययमत्यं
तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः किं तर्हि व्याकृतनामरूपत्वाद्धर्मादव्याकृतनामरूपत्वं धर्मांतरं तेन धर्मांतरेणा
यमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य कथमेतदवगम्यते वाक्यशेषात् यदुपक्रमे संदिग्धार्थं
वाक्यं तच्छेषान्निश्चीयते इदं तावदसदेवेदमग्र आसीदित्यसच्छब्देनोपक्रमे निर्दिष्टं यत्तदेव तच्छब्देन परामृश्य सदिति
विशिनष्टि तत्सदासीदिति असतश्च पूर्वापरकालासंबंधादासीच्छब्दानुपपत्तेश्च असद्वा इदमग्र आसीदित्यत्रापि तदात्मानं स्वय
मकुरुतेति वाक्यशेषे विशेषणान्नात्यंतासत्त्वं तस्माद्धर्मांतरेणैवायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य नामरूपव्याकृतं हि व
स्तु सच्छब्दार्हं लोके प्रसिद्धं अतः प्राङ्नामरूपव्याकरणादसदिवासदित्युपचर्यते॥ ॥२४॥ युक्तेः शब्दांतराच्च युक्तेस्तावत्का
र्यस्य प्रागुत्पत्तेः सत्त्वमनन्यत्वं च कारणादवगम्यते शब्दांतराच्च युक्तिस्तावद्वर्ण्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि
कारणानि क्षीरमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यंते न हि दध्यर्थिभिर्मृत्तिकोपादीयते न घटार्थिभिः क्षीरं त
दसत्कार्यवादे नोपपद्येत अविशिष्टे हि प्रागुत्पत्तेः सर्वस्य सर्वत्रासत्त्वे कस्मात्क्षीरादेव दध्युत्पद्यते न मृत्तिकायाः मृत्तिकाया एव सन्ति५
घट उत्पद्यते न क्षीरात् अथाविशिष्टेऽपि प्रागसत्त्वे क्षीर एव दध्नः कश्चिदतिशयो न मृत्तिकायां मृत्तिकायामेव च घटस्य कश्चिदतिशयो
न क्षीर इत्युच्येत अतिशयवत्त्वात्तर्हि प्रागवस्थाया असत्कार्यवादहानिः सत्कार्यवादसिद्धिश्च शक्तिश्च कारणस्य कार्यनि
यमार्था कल्प्यमाना नान्यासती वा कार्यं नियच्छेत् असत्त्वाविशेषादन्यत्वाविशेषाच्च तस्मात्कारणस्यात्मभूता शक्तिः

कथं चास्य उपपद्येत तस्मान्न ब्रह्म जगत्कारणमिति चेत्तन्नैव दोषः यतः क्षीरवद्द्रव्यस्वभावविशेषादुपपद्यते यथा हि लोके क्षीरं।
जलं वा स्वयमेव दधिहिमभावेन परिणमतेऽनपेक्ष्य बाह्यं साधनं तथेहापि भविष्यति ननु क्षीराद्यपि दध्यादिभावेन परिण-
ममानमपेक्षत एव बाह्यं साधनमौष्ण्यादिकं कथमुच्यते क्षीरवद्धीति नैष दोषः स्वयमपि हि क्षीरं यां च यावतीं च परिणाममात्रामनु-
भवत्येव त्वार्यते त्वौष्ण्यादिना दधिभावाय यदि च स्वयं दधिभावशीलता न स्यान्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत नहि वा-
युराकाशो वौष्ण्यादिना बलाद्दधिभावमापद्यते साधनसामग्र्या च तस्य पूर्णता संपाद्यते परिपूर्णशक्तिकं तु ब्रह्म न तस्यान्येन के-
नचित्पूर्णता संपादयितव्या श्रुतिश्च भवति न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते।
स्वाभाविकी ज्ञानबलक्रिया चेति तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात्क्षीरादिवद्विचित्रः परिणाम उपपद्यते॥ ॥देवा-
दिवदपि लोके॥ ॥स्यादेतत् उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावो दृष्टत्वात् चेतनाः पुनः कुला-
लादयः साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना दृश्यन्ते कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति देवादिवदिति।
ब्रूमः यथा लोके देवाः पितर ऋषय इत्येवमादयो महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्य किंचिद्बाह्यं साधनमैश्वर्यविशेषयोगा-
दभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेति-
हासपुराणप्रामाण्यात् तन्तुनाभश्च स्वत एव तन्तून्सृजति बलाका चान्तरेणैव शुक्रं गर्भं धत्ते पद्मिनी चानपेक्ष्य किंचित्प्रस्था- ११४
नसाधनं सरोऽन्तरात्सरोऽन्तरं प्रतिष्ठते एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वत एव जगत्स्रक्ष्यति स यदि ब्रूयात् य एते देवा-

दयो ब्रह्मणो दृष्टान्ता उपात्तास्ते दार्ष्टान्तिकेन ब्रह्मणा समाना न भवन्ति शरीरमचेतनं हि देवादीनां शरीरान्तरादिविभूत्युत्पाद-
न उपादानं न तु चेतन आत्मा तन्तुनाभस्य च क्षुद्रतरजन्तुभक्षणाल्लाला कठिनतामापद्यमाना तन्तुर्भवति बलाका च स्तनयित्नुरव-
श्रवणाद्गर्भं धत्ते पद्मिनी च चेतनप्रयुक्ता सत्यचेतनेनैव शरीरेण सरोऽन्तरात्सरोऽन्तरमुपसर्पति वल्लीव वृक्षं न तु स्वयमेवाचेतना सरोऽन्तरोपस-
र्पणे व्याप्रियते तस्मान्नैते ब्रह्मणो दृष्टान्ता इति तं प्रति ब्रूयात् नायं दोषः कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वादि-
ति यथा हि कुलालादीनां देवादीनां च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयः तथा ब्रह्म
चेतनमपि न बाह्यं साधनमपेक्षिष्यत इत्येतावद्वयं देवाद्युदाहरणेन विवक्षामः तस्माद्यथैकस्य सामर्थ्यं दृष्टं तथा सर्वेषामे-
व भवितुमर्हतीति नास्त्येकान्त इत्यभिप्रायः॥ ॥२५॥ ॥कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥ चेतनमेकमद्विती-
यं ब्रह्म क्षीरादिवद्देवादिवच्चानपेक्षितबाह्यसाधनं स्वयं परिणममानं जगतः कारणमिति स्थितं शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति कृ-
त्स्नप्रसक्तिः कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति निरवयवत्वात् यदि ब्रह्म पृथिव्यादिवत्सावयवमभविष्यत्ततो-
ऽस्यैकदेशः पर्यणंस्यदेकदेशश्चावास्थास्यत निरवयवं तु ब्रह्म श्रुतिभ्योऽवगम्यते निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्ज-
नं दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः इदं महद्भूतमनन्तमपारं विज्ञानघन एव स एष नेति नेत्यात्मा अस्थूलमनण्वित्या-
द्याभ्यः सर्वविशेषप्रतिषेधिनीभ्यः ततश्चैकदेशपरिणामासंभवात्कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत द्रष्टव्य-
तोपदेशानर्थक्यं चापद्यते अयत्नदृष्टत्वात्कार्यस्य तद्व्यतिरिक्तस्य च ब्रह्मणोऽसंभवात् अजत्वादिशब्दकोपश्च अथैतद्दोषपरिजि-

स्तमोद्दात्मकं सामान्यं तत्त्रिगुणं। प्रधानं चेदृग्दावतनं चेतनस्य पुरुषस्यार्थं साधयितुं प्रवृत्तावेनेव विचित्रेण विकारात्मना विवर्त्त
त इति। तथा परिमाणात् द्विविरयिलिंगैः साद्व्यप्रधानमनुमिमते। तत्र चदामाय दिदृक्षांतबलेनेतन्निहृष्येतनाचेतनेलोके चेत
नेनानधिष्ठितं स्वतंत्रं किंचित्किंचिदेककार्यार्थे स्वित्वे समर्थो न विकारान्वेति स्वयदृष्टेंगदृश्वासादायनामनविद्वारत्नस्माद
यो हि लोके ज्ञानवृद्धिः शिलिशिक्षया क्तालेसमरदुःखपीयिपरित्राणमानस्यारयि तादृशं पात। मायदं जगदखिलं प्रथिव्यादिना
नाकर्मफलोपनागायायपं वादमाधाशिकं चचारी रादिनानां आत्मविर्तं प्रतिनियतावयवविन्यासमनेककर्मफलानुभ
वाधिष्ठानेदृश्यमानं प्रज्ञावद्भिःसंतानितमोः शिलिशि[illegible]नामाप्यात्तो च यितुमशक्यं सकरूपमचेतनेप्रधानेरचायितुं पापा।
णादिप्रतिकृतिसकाश[illegible]वि[illegible]कात्मता[illegible]मस्यापि च मनांतमधिष्ठितदयसंयोगनवष्टदाफपादा।
नष्टरूपप्रत्यपाश्चयेशोनधर्मे[illegible]कारणमनव[illegible]र्वद्वा[illegible]तदादिव्यापाराय[illegible]णेति किंचिन्नियामककमपि नचिवं मति
किंचिद्दिस्थितेशियत्व[illegible]कतिर्तं[illegible]कारणप्रमयेणादतो स्यनातुप्रयात्सश्यादतो नाचितनं[illegible]कारणमुव
मातव्यत्वनयत[illegible]पपतेस्त्वतिस[illegible]नमसुविते[illegible]न दिवा[illegible]मिका नां भेदानां सुखदुःखामोहात्मकतया चयत्र
पपद्यत सुखादीनामांतरत्वप्रतीतेः। बाह्यादीनां चात्[illegible]प्रतीतेसुखिसिमिनचप्रतीतेश्च। बाह्यविशेषाद्यपि च[illegible]नाविशे॥ ११७
षा[illegible]सुखादिविशेषोपलब्धयापरिमितानां भेदानां मूलं कारणादीनां संसर्गपूर्वकत्वं दृष्टा बाह्याध्यात्मिकानां भेदानां तदा
नां परिमितत्वात् संसर्गपूर्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसंगः परिमितत्वाविशेषात्कार्यकारणभाव।

सुखेत्सर्वेनिमितानां यनादीनां हृष्टमिति न कार्यकारणभावाद्वाह्याध्यात्मिकानां भेदानामचेतनसर्वकर्तृत्वं शक्यं कल्पयितुं॥ ॥
तं॥ [illegible]॥ ॥अहंतावदियं[illegible]॥ चिद्रूपा[illegible]प्रकृतिः[illegible]वस्थानात्[illegible]प्रकृतिः सत्त्वरजस्तमसां साम्यरूपा यन्निर्विशि
ष्टकार्यामिषुरसप्रदर्शितमापिनाम्बिजमसप[illegible]रतमो[illegible]दृष्टादिपुदरोजाद्वृष्ट्यादिभुवनदिष्टदादयोरस्यादयोचेत
नासंतश्चेतनेः कला[illegible]दिसिस्थादिसिद्वी[illegible]सिद्धकामो[illegible]पुरुषप्रकृत्योर्द्वयंते। वस्त्वादृष्टमिविरतः[illegible]स्युपपत्तेरा।
पिद्धत्वाचो चतनेज[illegible]कारण[illegible]इत्यसदति[illegible]तस्यापि[illegible]केवलस्य[illegible]। मध्यमेतस्यापि चेतनसंयुक्तस्य स्यादेरा।
वतनस्य प्रदृहितिदृष्टा। न[illegible]संयुक्त[illegible]प्रकृ[illegible]निर्दृष्ट[illegible]संयुक्तं। यस्मिन्प्रवृत्तिर्दृष्टा न स्यात्सयत्रकार्यकृतकमवदृष्टानाः
प्यमेति। ननु च[illegible]लिरस्थेवात[illegible]पुरुषस्य[illegible]। न[illegible]हृष्टा[illegible]नलेदलायमतलो स्यादि वल्लयकास्य।
दृष्टा अथ यदेतादि पुंडरूकस्येवत्रा[illegible]विलक्षणं जीववाहदमस्याहदृष्टिमिति। अतएव च पश्च
कृदेदेषप्रतिवितत्यादर्शेनादमति[illegible]कायतिकाः प्रतिप[illegible]स्याश्चेतनसस्येव प्रवृत्तिरिति। तदा
निधीयते। ननु[illegible]यस्मिन्नचेतने[illegible]नित्रैनं[illegible]तुदेतनाद्ववतीति दृष्टाः। तदारब्धाचादत्तानां वचाना[illegible]।
घथाकाष्ठादिप्रयाप्रयापिदा[illegible]निर्नियाहृपल्लस्यापनापि च केवलेकलनेहलना[illegible]वनृवतिनक्षयोगदर्शी
नान्नदिवियोगचात् दर्शनान्नत्वोकायिकानाम[illegible]नदृष्टो[illegible]चेतनानारथेदीनामप्रवृत्तेरकारणस्यविप्रतिबिंबवचनस्य
वस्तेकार्यं नन्तुभवदोषादिसंयुक्तस्यात्मनो[illegible]नस्योपसानयमिरकृतापत्र[illegible]नुपपन्नेरनुपपत्तं प्रवर्त्तकत्वमितिबिन्नायां

तिशाद्दीयते यदि ब्रूयात्तु सत्त्वकार्यैदं केवलं नाभेज्ञानेन प्रयोजनमपीति। तथापि प्रधानप्रवृत्तेः प्रयोजनं विवक्तव्यं। भोगो वाप्याप
पवर्गो वा स्वयं वितिनोलश्रेतुको दशो न बाध्यया निश्चयस्य भोक्तृरूपस्य तो गो नवेदनिर्मोक्षप्रसंगश्च॥ अपवर्गश्चेत् प्रागपि प्रवृत्तेरपवर्ग
स्य सिद्धत्वात् प्रवृत्तिरनर्थिका स्यात् ... शब्दाद्यनुपलब्धिप्रसंगश्च ... प्रधानमात्राणामानंत्याद्दनि
र्मोक्षप्रसंगः ... थोभयार्थाप्रवृत्तिः। ... विनतयोस्तु कृत्स्नं दर्शितं च ... निर्मलस्य द्रक्शक्तिसर्गशक्ति
विषयत्वेनयाब्रह्मरश्मिसंशीर्थोत्स्यात् केवल दर्शनं शक्त्योः ... निर्मोक्षप्रसंगात्... नस्य भूरूपार्थप्रवृत्तिरिति चेत् दृश्य
क्तौ॥६॥ पुरुषाश्मवदिति चेत्तथापि॥ यथा दृक्शक्तिं प्राणाक्त्यक्षुरूपो ... क्रियसंपन्नः प्रवृत्तिशक्तिविहीनः पंगुरपरं भूरूपप्रव
त्तिशक्तिसंपन्नं दृक्शक्तिविहीनमंधमधिष्ठाय प्रवर्त्तयति। यथा वा। यस्कांतोऽश्मा स्वयमप्रवर्त्तमानोप्ययः प्रवर्त्तयत्येवं पुरुष
प्रधानं प्रवर्त्तयिष्यतीति दृष्टांतप्रत्येननुनः प्रत्यवस्थानमभिप्रायते। तथापि नैव दोषान्निर्मोक्षोऽभिप्रायस्मद्धानं तावद्दोषश्चाप
तति। पथानस्यत्वतंत्रस्य प्रवृत्त्यभ्युपगमात् ... प्रवृत्तिकहानप्रसंगात्। कथं चोदासीनः पुरुषः प्रधानं प्रवर्त्तयेत् पंगुर
पि ह्यंधं वागादिभिः प्रवर्तयति नैवं पुरुषस्य कश्चित् प्रवर्त्तनव्यापारोऽस्ति निःक्रियत्वान्निर्गुणत्वाच्च। नाप्ययस्कांतवत्संनिधिमा
त्रेण प्रवर्त्तयेत् संनिधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसंगात्। अयस्कांतस्य त्वनित्यः संनिधिरस्ति स्वव्यापारसंनिधिपरिमार्जनाद्यपेक्षा वा
स्य द्वीत्यनुपन्यासः पुरुषाश्मवदिति। तथा प्रधानस्याचेतनत्वात् पुरुषस्योदासीनत्वात् तृतीयस्य तयोः संबंधुरभावात् संबं
धानुपपत्तिर्योग्यतानिमित्ते च संबंधे योग्यतानुच्छेदादनिर्मोक्षप्रसंगः सर्वेषु च वाद्यप्ययोगात् विकल्पयितव्याः परमात्मनस्तु १२१

सूपगमात् ... मायामयवेश्वर्यत्वं च प्रवर्त्तकत्वमित्यस्त्यतिशयः॥ ॥७॥ अंगित्वानुपपत्तेश्च॥ ॥इतश्च न प्रधानस्य
प्रवृत्तिरवकल्पते यत्नु ... सत्त्वरजस्तमसामन्योन्यगुणप्रधानभावमुत्सृज्य साम्येन स्वरूपमात्रेणावस्थानं प्रधानावस्था
स्यामवस्थायामनपेक्ष्य स्वरूपाणां स्वरूपप्रणाशभयात् परस्परं प्रत्यंगांगिभावानुपपत्तेर्बाह्यस्य च कस्यचित्क्षोभयितु
रभावाद्गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यात्॥ ॥८॥ अन्यथानुमितौ च ज्ञशक्तिवियोगात्॥ अथापि स्यादन्य
थावयमनुमिमीमहे यथा नायमनंतरो दोषः प्रसज्यते। न ह्यनपेक्षस्वभावाः कूटस्थाश्चास्माभिर्गुणा अभ्युपगम्यंते प्रमाणा
भावात्। कार्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते। यथा यथा कार्योत्पाद उपपद्यते तथा तथैतेषां स्वभावोऽभ्युपगंतव्यः चलं
गुणवृत्तमिति चास्त्यभ्युपगमः। तस्मात्साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठंत इत्येवमपि प्रधानस्य ज्ञश
क्तिवियोगाद्रचनानुपपत्त्यादयः सर्वे का दोषास्तदवस्था एवं ज्ञशक्तिमपि चानुमिमानः प्रतिवादित्वान्निवर्त्तेत। चेतनमेकम
नेकप्रपंचस्य जगत उपादानमिति ब्रह्मवादप्रसंगात्। वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्ताभावान्नवैषम्यं
भजेरन् भजमाना वा निमित्ताभावाविशेषात् सर्वदैव वैषम्यं भजेरन्निति प्रसज्यत एवायमनंतरोपि दोषः॥९॥ विप्रतिषेधा
च्चासमंजसं॥ ॥परस्परविरुद्धश्चायं सांख्यानामभ्युपगमः क्वचित्सप्तेंद्रियाण्यनुक्रामंति क्वचिदेकादशात्तथा क्वचिन्महत
स्तन्मात्रसर्गमुपदिशंति क्वचिदहंकारात्तथा क्वचित्त्रीण्यंतःकरणानि वर्णयंति क्वचिदेकमिति। प्रसिद्ध एव तु श्रुत्येश्वरकारण
वादिन्या विरोधस्तदनुवर्त्तिन्या च स्मृत्या तस्मादप्यसमंजसं सांख्यानां दर्शनमिति। अत्रेदं। न चोपनिषदानामप्यसमंजसमिच

दर्शनं तप्यतापकयोः। जाड्यं तत्त्वावर्णनरूपप्रमादकं हि बुद्धिसत्त्वमविमलकं सर्वस्य तं पंचस्य कारणमनरूपगछता। सक्तस्यैवात्म
नो विज्ञानर्वै तप्यतापकोल क्ताच्यंतरन्नता क्लिष्टस्तपगं तत्वं स्याद्धशिवे तोन तप्यतापकत्वं कस्यात्मनो विज्ञेयो स्यातां मना
स्यां तप्यतापकाव्यां न मिस्रुं स्य सत्तिता ... तायसम्यग्दर्शनेन प्रतिष्ठिताच्छा स्मनर्थकं स्यात्। इद्वो द्रष्टा प्रकाशधर्मकस्य
दीप्रभातस्वच्छ। स्येवस्य संप्रतिबिंबो रूपपत्ते तेयोपि कलवीनी करं नाफलात्वदपन्यासमङ्गता पि उत्तानसन एकस्य वीत्यादयो।
विशेषा आविर्भावतिरोभावक्षयपहानिव्यापदेशभिन्नोऽत्र मनोवी ... दिशिर निर्मोक्षः प्रसिद्ध आयं तप्यतापकयोर्जा
ड्यंतरनावाला। ... तथा द्रष्टार्थयोराश्रयान्योन्य ... र्थिनः कृतो नार्थोन स्यात्। नायास्यार्थिनोऽथविषयमर्थिं च।
मतस्यार्थो नित्य ... वेतितस्यतद्विषयमर्थिं चेन स्याद्यथा प्रकाशाश्रयनः प्रदीपस्य प्रकाश्यास्यो ... र्थो नित्यमि ... वेतुनन
स्यतद्विषयमर्थिं चे ... वत्यप्रसेद्धार्थो र्थिनोर्थिं च स्यादिति। तथार्थो ... र्थो तं नस्यान्य ... चाच्यं ... नस्वितद्वि ... संबंधि
वा ह्यो द्धेता वर्थास्यर्थ श्चेति द्वायाश्च संबंधिनोः संबंधस्यानिकस्यैव। तस्मात् द्विनाव तावर्थार्थिनोः स्यानर्थो नर्थिना वप्यर्थि
नाऽग्रहलोर्थः। प्रतिक्लीनोर्थिनः स्यात् सकः प्रयोगेण उत्पात्स्यां संबध्यते तत्रार्थस्याल्पीयस्त्वात्मप्रकाशानर्थस्योत्वाप्य।
र्थो वनर्थेणा वर्तितापकः। स उच्यते तत्र ... कार्यपर्यायानां सान्यां संबध्यत इति। तयोस्तप्यतापकयोः स्वकालता यांत्वा
द्धा उपपन्निर्जीवं तं तरनावे उतसंयोग देहपरिहारं स्यादपि कदाचिन्मोक्षोपपन्निरिति। अत्रोच्यते। न कश्चा द्भतप्यतापकता १२२
वा उपपन्निर्जीवादघदोषा याद्य कालता यां तप्यतापकावन्योन्यस्य विषयविषयिनांवं प्रतिपद्येयातां न चेतद्विप्रकर्षादवन

द्धत्रिसकाः सत्प्रयमात्मानं ददातिश्च कारायतिवास्तत्त्वप्यो। ह्युपप्रश्नावादिधर्मा तदपरिणामिचिच्चकित्सुक्तः। रक्षे बद्धाप्येकस्मिन्ता
प्यतापकत्वावः। संतवेत्ताक उनरयंतप्यतापकत्वाव। स्यात् द्विष्यते किं तपरयमित्कर्म द्विषो जीवादहं। तप्यः। ताएकः। अविते ति। न च
तस्मिनो मदुसंस्मा। दलत्थिद्धर्वा वेतनस्याद्दस्य यदि लिद्दृष्टेवतत्थिः स्यात्सदाद्दनारोस्वयामवनयत्यनीतितज्ञाशायस्याधनंनेवि
नव्यंस्या। हिति उच्यते। दव्हाना। द्विपिकवलस्यावतन ... तसिर्मदृष्टान्तं चवद्याप्रितमिनोर्ग चिक्रियावतश्चिद्रे केवलस्यैप्यतोना पिदद्दृ
वतताया संदत्तवमचुक्ताहिदावप्रसंगानं चत्ते ... तत्त्विमस्यप्रक्रूतिकथं तवापितप्यतपकत्वावः सत्वं तप्यं तापकं रजदशित्विन
तास्वं तत्त्विमस्य संबधस्य चाउपपन्नेः सत्वा च रा धिया चलाना पितप्यत्वेतिचेत। परमार्थतस्तु द्वितीनवतप्यतद्व्यापतनी वृत्ता हृशाया।
गान्न वितत्प्यताप वश्च हो लाघयन हि दुःख ... प्रत्ये ... ताससतिपो स्तद्वति। सर्वेवा दुःखं इवेच्येतात्ता निर्विषाय्तत्थावि
घातका यं तप्यतापकत्वावाः न परस्मार्थिक इत्येव ... तस्य ... मिति ... प्रतिमय ... सिद्धं उपपन्नयथारमार्थिकस्येव ... नस्यत।
प्यतमस्कप्रग्द्धरि ... ताद्वे दुःखराम निर्मोक्षः ... प्रमाणः ... तप्यतापकः ... चापि स निमित्तम्
यत्तापकस्वा ... दर्शन ... तिव ... योगो परमहत्वाद्येतिकामो रूउपपन्न इतिनिर्मेदर्शनस्यत
मसोनिद्धच्य ... योरप्रितत्वात् नियतः संयोगानियत्संयोगा निमित्तोऽपरम इति क्रियोगस्यानिय
तत्वात्संयस्यैवा हि दीन्ता। परिहार्यं स्यात्सेपनिरुदस्य चात्मैकत्वा ... प्रमादकस्य च विषयविषयिनांवा उपपत्तेः। विकारत्वे
दस्य च वा वा संलग्नमात्र च प्रवणादर्शिनो दोषांकाववेम पिना पञ्जायात व्यवहृत उपनययथा सुख दुःखप्यतापकतावस्तत्वत तथैव सा।

इति न्यायदर्शितेयत्तः परिहर्त्तव्यो भवति॥७॥ प्रधानकारणवादो निराकृतः॥ परमाणुकारणवाद इदानीं निराकर्त्तव्यः तत्रा
दौ तावद्योऽणुवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते स प्रतिसमाधीयते। तत्रायं वैशेषिकाणामभ्युपगमः कारणद्रव्यसमवा
यिनो गुणाः कार्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्ययादर्शना
च्च तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात्। तददर्शनात्तु न चेतनं ब्रह्म जग
त्कारणं भवितुमर्हतीति इममभ्युपगमं तदीययैव प्रक्रियया व्यभिचारयति॥८॥ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां॥
एषा तेषां प्रक्रिया परमाणवः किल कंचित्कालमनारब्धकार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणाश्च तिष्ठन्ति। ते च
पश्चाददृष्टादिपुरःसराः संयोगसचिवाश्च सन्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च कार्ये गुणान्तरं।
यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमाणुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनपरानारभन्ते परमा
णुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारिमाण्डल्यमपरमारभते द्व्यणुकस्य परिमाणान्तरयोगाभ्युपगमात् अणुत्वह्रस्वत्वे हि
द्व्यणुकवर्त्तिनी परिमाणे वर्णयंति यदापि द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीना
मारंभकत्वम् अणुत्वह्रस्वत्वे तु द्व्यणुकसमवायिनी अपि नैवारभेते चतुरणुकस्य महत्त्वदीर्घत्वपरिमाणयोगाभ्युपगमात् यदा
पि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते तदापि समानैषा योजना तदेवं
यथा परमाणोः परिमण्डलात्सतोऽणु ह्रस्वं च द्व्यणुकं जायते महद्दीर्घं च त्र्यणुकादि न परिमण्डलं यथा वा द्व्यणुकादणोर्ह्रस्वाच्च स १२३

तो महद्दीर्घं च त्र्यणुकं जायते नाणु नो ह्रस्वम् एवं चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्यत इत्यभ्युपगमे किं तव च्छिन्नम् अथ म
न्यसे विरोधिना परिमाणान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादीत्यतो नारम्भकाणि कारणगतानि पारिमाण्डल्यादीनीत्यभ्युपगच्छा
मि न तु चेतना विरोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगता चेतना कार्ये चेतनान्तरं नारभेत न ह्यचेतना नाम
चेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात् तस्मात्पारिमाण्डल्यादिवैषम्यात्प्राप्नोति चेतनाया आरम्भकत्वमिति
मैवं मंस्थाः यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारम्भकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात् न च परि
माणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारम्भकत्वे कारणं प्राक्परिमाणान्तरारम्भात्पारिमाण्डल्यादीनामारम्भकत्वोपपत्तेः आरब्धमपि
हि कार्यद्रव्यं प्राग्गुणारम्भात्क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात् न च परिमाणान्तरारम्भे व्यग्राणि पारिमाण्डल्यादीनीत्यतः स्व
समानजातीयं परिमाणान्तरं नारभन्ते परिमाणान्तरस्यान्यहेतुत्वाभ्युपगमात् कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्च
महत् तद्विपरीतमणु एतेन दीर्घत्वह्रस्वत्वे व्याख्याते इति हि काणभुजानि सूत्राणि न च संनिधानविशेषात्कुतश्चित्कारणबहु
त्वादीन्येवारभन्ते न पारिमाण्डल्यादीनीत्युच्येत द्रव्यान्तरे गुणान्तरे वा आरभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवाया
विशेषात्तस्मात्स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वं तथा चेतनाया अपीति द्रष्टव्यं संयोगाच्च द्रव्यादीनां विलक्षणानामुत्पत्ति
दर्शनात्समानजातीयोत्पत्तिव्यभिचारः द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेन्न दृष्टान्तेन विलक्षणारम्भमात्रस्य वि
वक्षितत्वात् न च द्रव्यस्य द्रव्यमेवोदाहर्त्तव्यं गुणस्य वा गुण एवेति कश्चिन्नियमे हेतुरस्ति सूत्रकारोऽपि भवतां द्रव्यस्य गुणमुदाज

द्रावयवनाशावयवत्वात् संयोगस्यपंचात् ...ंनश्यि अनित्यत्वाच्चावयवनाशावयवसंयोगविनाशाभ्यां नाशः। समवायिनः संयोगोऽवयवा
कार्यं द्रव्यमवयवं कोऽपि पंचकश्चेते ... शरीरंतस्मान्नपांतनो विकमिश्रेत द्व्यणुकं नवति। गुण
श्च संयोगोऽद्रव्यारंभकः परे ... लक्षणास्त्रिः अवंधि ... तिष्ठेत अंतानति भ्रमसंख्या परिमाणं कामता।
तुविशेषेकं वतिनश्चेति द्रव्यादिसमानत्वायतयाक्रतपनेन निशिष्टोऽपि ... व्याख्याता ... तिसद्भावमत्तत्वस्य वचनं विशेषि
कपरीक्षारंभेन तस्वक्रियाउगतेन निदर्शनितमपंचःकृता।। ।।९।। अथ ... पिन कर्मातं सहसाव।। ।।इदानीं परमाणु
कारणवादं निराकाराति। न चवादस्त्वं समस्तिप्रितिपादानी निहितिलोकसावयवाणि द्रव्याणि स्वावयवगतेः संयोगस्य चिवे तंचा।
दिनिर्देश्येरारस्यमाणानि दृष्टानि। तस्मात् सामान्येनयाः स्वक्रिविभक्ताः स्वस्वं सर्वे तेनवताः समं स्यात्। गमविविधेषे डंप्येरारब्धमितिग
म्यात। समवायमवयवावयवविभागाद्याता निवर्तन्ते सोपकर्षपर्यंतगतः परमाणुः सर्वेत्विदं गिरिसमुद्रादिकं जगत्सावयवत्वा
द्घटवच्चाकारणतो नकार्यंगत वितव्यमित्यतः परमाणावाजगता कारणशिनिकणानुगतिपोपं।। तानी सानि वचारित्यतानि।
न्दृष्ट्वा स्पर्शवंततेजः पवनाख्यानि सावयवान्यल्पपरिमाणवाद्विंशाः परमाणवः। एति कल्पतेतेषां चापकर्षपर्यंतगतत्वेन परतो वित्ता
गासंतवादिनिःअयप्तांपृथिव्यादीनांपरमाणुपर्यंता विनाशा भावति। मध्यपक्षकालेः ततः सर्गकाले वायवीयेष्वणुष्वदृष्टापेक्षं १२५
कर्मोत्पद्यते। तत्कर्मसंचावयवमणुमण्वंतरेण संयुनक्ति ततो द्व्यणुकादिक्रमेण वायुरुत्पद्यते। एवमग्निरेवमापः पृथिव्ये
वमेव शरीरेन्द्रियसहितेयं सर्वेषिदं जगद्गुण्यः संलवद्गुणाना तत्स्वस्वरूपादि... द्व्यणुकादिगता निरूपादीनि संत्वं तितं उपट

न्यायेनतिक्रमणासामर्थ्यं तेनात्र तदिदमविधीयते। विभागावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽपेक्षकं तत्त्वः कर्मवतां तं चादीनां सं
योगदर्शनात् कर्मणश्च कार्यं चान्निमित्तं किमपेक्ष्यपगंतव्यं। अनपेक्षपगाम निमित्ताभावात्। अणुद्वयं कर्मस्यास्त्वपगाम प्रियदि।
प्रयत्नो गतिवातादि वा यथाहृष्टं किमपि कर्मणाना निमित्तमवक्षपगन्मेतत स्या... तवान्नेवाणुद्वयं कर्मस्यान्न हि तस्यावस्थाया।
त्मगुणः प्रयत्नः संभवति शरीराभावात् शरीरप्रतिष्ठेहि मनस्यात्ममनः संयोगात् इच्छा सगुणः प्रयत्नो जायते नापि तेन निवाता
द्यपिदृष्टं निमित्तं प्रत्याख्यातव्यं। सर्गोत्तरकालं हि तत्सर्वे नाशस्य कर्मणो निमित्तं समवद्यथादृष्टं माद्यस्य कर्मणो निमित्तम
न्यक्ल्पतां तत्पुनरात्मसमवायि वास्यादणुसमवायि वा सर्वथापि नादृष्टनिमित्तमणुकर्मावकल्पेत। अदृष्टस्याचेतनस्यास
तमवस्थायामात्वतनवादात्मसमवायिचात्स्फुपगमान्नादृष्टमणुकर्मणो निमित्तं स्यात्। संबंधः दृष्टवता ...
नां संबंध इति चेत्संबंधमात्रर्थस्य च न विसात्यसंगो नियामकं तरसंना वा वादत्वं निय... विचकर्मनिमित्तस्यानावात् नाणुद्वयं क
मस्याकर्माभावान्न निबंधनः संयोगो न स्यात् संयोगात्तावान्नतन्निबंधनं द्व्यणुकादिकार्यं जातं तस्मात् संयोग। अधापरे एवं तरेण
सर्वात्मना वास्यादेकदेशेन वा। सर्वात्मनाचेदुपचयानुपपत्तेरणुमात्रत्वप्रसंगो दृष्टविपर्ययप्रसंगश्च एकदेशावृत्तो द्व्यस्यप्रदेशाव
ताद्व्यंतरणसंयोगस्य दृष्टत्वात् एकदेशेन चेत्स्वावयवत्वप्रसंगः परमाणूनां कल्पिताः प्रदेशाः स्युरिति चेत् कल्पितानामवस्
तुत्वादवस्तु च संयोग इति वस्तुतः कार्यस्यासमवायिकारणं स्यात् समवायिकारणे द्व्यणुकादि कार्यद्रव्यं नोत्पद्ये
तयथावादिसर्गे निमित्ताभावात् संयोगाद्युत्पत्त्यर्थं कर्म न अणूनां संभवत्येवं महाप्रलयेऽपि विभागार्थं कर्म नैवाणूर्।

तावत्स्वाभ्युपगमो विरुध्येत कथं तं चास्त्येोक्षिपदः तंतुदेशो ऽभ्युपगम्यते न तु पटवदंशः पटस्य तु गुणाः शुक्लत्वाद्व्यपदेशा।
ऽभ्युपगमं तेन तंतुदेशाश्रयाद्वा हुंद्याणि द्रव्याणि तस्मिंस्तेषु गुणाः स्युः गुणांतरमिति। तंतवो हि कारणद्रव्याणि कार्यद्रव्यं पटमार
ब्धं ते तंतुगताश्च गुणाः शुक्लत्वादयः कार्यद्रव्ये पटे शुक्लत्वादिगुणांतरमारभंते इति सिद्धिते ऽभ्युपगच्छंति। एणाभ्युपगमा द्रव्यगुण
योरत्यंतदेशाद्वे ऽभ्युपगम्यमाने जाध्येयं ते थापि अथ कुंकुमालव मयुतसिद्धत्वयुक्तमसम्यक् द्विणाया रूपिणा विषाणा यारयुतसि
द्धत्वं प्रसज्येत अथ कथं तावद्वस्तु तसिद्धत्वेन द्रव्यगुणयोरात्मलाभदा संभवति। तस्य तादात्म्येन वर्तीयमानत्वाद्युतसिद्धाया सं
बंधः संयोगो ऽयुतसिद्धयोस्तु समवाय इत्ययमभ्युपगमा श्रीपद्वेतेषां प्राक्सिद्धस्य कार्यां कारणस्यायुतसिद्धत्वादुपपत्तेरथान्
तराप्रत्याद्वा यमभ्युपगमः स्यादयुतसिद्धस्य कार्यस्य कारणेन संबंधः समवायः स च वर्णपिंडावगमसिद्धस्यालब्धात्मकस्य कार्यस्य
कारणेन संबंधो नोपपद्येत तया पत्तच्चास्संबंधस्य सिद्धत्वाच्चासंबध्यत इति वत्वाकारणं संबधा कार्यस्य सिद्धावभ्युपगम्यमान
यां त्वयुतसिद्धत्वा वा कार्यकारणयोः संयोगविभागौ न विद्येते इतीदं तु प्रकृतं स्याद्याद्यावोत्पन्नमात्रस्याक्रियस्य कार्यद्रव्यस्य
विभुभिराकाशादिभिर्द्रव्यांतरैः संबंधः संयोग एवाभ्युपगम्यते न समवायः एवं कारणद्रव्येणापि संबंधः संयोग एवस्यान्न सम
वायः। नापि संयोगस्य समवायस्य चासंबंधस्य संबंधिव्यतिरेकेणास्ति किंचित्प्रमाणमस्ति। संबंधिन्नाहृप्रत्ययव्यतिरेकेण सं।
योगसमवायग्राहकप्रत्ययदर्शनात्तयोरस्तित्वमिति चेन्न कश्चेपि प्रत्यक्षवादाप्रत्यक्षा पप्रत्ययानेकत्राहिप्रत्ययदर्शनाद्यथैकोपिसं
न्नादवक्तो लोके प्रत्यक्षसंबंधात्प्रत्ययपेत्यानकर्णाहृप्रत्ययस्ता संवतिमहत्प्यो व लक्षणाः श्रोत्रियो वदाता वा लाघुवा स्कविरः पि। १२७

ता ब्रह्मः पोत्राज्ञाताजापातेतियथा विक्रापिस्तीर खा स्थानानामन्येन निवर्त्यमानेक्दशात तमन्द्रस्मादिन्नाहृप्रत्ययान्तदमनुनवति
तथा संबंधिनां रवसंबंधि न्नाहृप्रत्ययव्यतिरेकेण संयोगसमवायान्नाहृप्रत्ययादर्दवं नव्यतिरिक्तवस्तु स्विच्चेन्नभ्युपलब्धिलक्षण
प्राप्तस्यानुपलब्धेरप्ता वावस्तंतरस्यनापि संबधि विषयचे संबंधज्ञाहृप्रत्ययायोः सततत्वावप्रसंगः न्व्रद्रूपवाद्यक्षुपाप्रत्ययकल्पोन
रवात्तथाप्यात्ममनसाम प्रदेशत्वान्नसंयोगः संभवति। प्रदेशवतोद्रव्ययोः प्रादेशवताद्व्यांतराणं संयोगदर्शनात् कल्पिताः प्रादेशा।
आत्मात्ममनसोंत्तविषयंतीति वन्न विद्यमानार्थस्य कल्पनायां सर्वार्थसिद्धिप्रसंगात्। दियानेवा विद्यमानो विद्यते ऽर्थः कल्पनीयो।
नातोधिक इति नियमादृत्रतावाकल्पनायाश्च स्यायत्तत्वात् स्तत्र संभवात्।। न चावेशोपि क्लेशः कल्पितत्वात्। षट् द्रव्यार्थस्यात्यधिकताः वा।
तेसदर्थयाथायो न कल्पयितव्या इति निवारको दुरस्ति। तस्मात्य स्मै यस्मै यद्यद्रोचते तत्तत्सिध्येत् कश्चिद्दयालुः प्राणिनां दुःख बहुलः।
संसारः एवमात्त्वक्षितिकल्पयेदन्यो वा व्यसनी शुक्रानाम पिजनस्य निःकल्पाय कल्पयो निवारकस्यात् किं वान्यत्। एतस्यामणुत्वं निर।
यवयवाल्पांसा वय वस्य च णुकस्याकाशेन च संश्लेषाद्युपपत्तिर्नेत्याकाशाम्य एष श्रियादीनां च कुड्यकाष्टवत्सं सेभावा स्ति। कार्यका
रणद्रव्ययोराश्रिताश्रयत्ना वात्पपद्यानोपपद्यते स्थवत्संकल्प समवाय इति वेन्नेतरेतराश्रयत्वात् कार्यकारणयोर्हि भेदसिद्धावा
श्रिताश्रयत्नावसिद्धिराश्रिताश्रयत्नावसिद्धौ च तयोर्भेदसिद्धिः कुंडबदरयोरितरेतराश्रयता स्यान्न हि कार्यकारणयोर्भेदज्ञा आश्रिताश्र
यत्नावेवावदांतवादिभिरभ्युपगम्यते कारणस्यैवसंस्थानमात्रं कार्यमित्यभ्युपगमात् किंवान्यत्परमाणुनां परिच्छिन्नत्वाद्यावन्त्यो
दिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते स्युः सावयवत्वादनित्यास्ते इति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्येत यांस्त्वं दिग्भेदे

त्रि

दादनवस्थाशंकी उपपन्ना। साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्रुपलभ्यभावोपपन्नः स्वयंसिद्धस्य च साक्षिणोऽप्र
त्याख्येयत्वात्। किंच प्रदीपवद्विज्ञानमवभासकान्तरनिरपेक्षं स्वयमेव प्रथत इति ब्रुवता अप्रमाणगम्यं विज्ञान
मनवगन्तृकमित्युक्तं स्यात् शिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत्। बाढमेवमनुभवरूपत्वात्तु विज्ञानस्येष्टो नः पक्ष
स्त्वयानुज्ञायत इति चेन्नान्यस्यावगन्तुश्चक्षुःसाधनस्य प्रदीपादिप्रथनदर्शनात्। ततो विज्ञानस्याप्यवभास्यत्वाविशेषात्सत्येवा
न्यस्मिन्नवगन्तरि प्रथनं प्रदीपवदित्यवगम्यते साक्षिणोऽवगन्तुः स्वयंसिद्धतामुपक्षिपता स्वयं प्रथते विज्ञानमित्येष ए
व मम पक्षस्त्वया वाचोयुक्त्यन्तरेणाश्रित इति चेन्न विज्ञानस्योत्पत्तिप्रध्वंसानेकत्वादिविशेषवत्त्वाभ्युपगमात्। अतः प्रदीप
वद्विज्ञानस्यापि व्यतिरिक्तावगम्यत्वमस्माभिः प्रसाधितं॥ ॥२८॥ छं॥ ॥वैधर्म्याच्च न स्वप्नादिवत्॥ यदुक्तं बाह्यार्थोपल
ापिना स्वप्नादिप्रत्ययवज्जागरितगोचरा अपि स्तंभादिप्रत्यया विनैव बाह्येनार्थेन भवेयुः। प्रत्ययत्वाविशेषादिति तत्प्रतिव
क्तव्यमत्रोच्यते न स्वप्नादिप्रत्ययवज्जाग्रत्प्रत्यया भवितुमर्हन्ति कस्माद्वैधर्म्यात् वैधर्म्यं हि भवति स्वप्नजागरितयोः
किं पुनर्वैधर्म्यं बाधाबाधाविति ब्रूमो॥ बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य मिथ्या मयोपलब्धो महाजनसमागम इ
ति॥ नह्यस्ति मम महाजनसमागमो निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रान्तिरुद्बभूवेति। एवं मायादिष्वपि भवति यथायथं बा
धः। नैवं जागरितोपलब्धं वस्तु स्तंभादिकं कस्यांचिदप्यवस्थायां बाध्यते। अपि च स्मृतिरेषा॥ यत्स्वप्नदर्शनमुपलब्धिस्तु जा १३४
गरितदर्शनं स्मृत्युपलब्ध्योश्च प्रत्यक्षमंतरं स्वयमनुभूयतेऽर्थविप्रयोगसंप्रयोगात्मकमिष्टं पुत्रं स्मरामि नोपलभ उप

लब्धुमिच्छामीति॥ तत्रैवं सति न शक्यते वक्तुं मिथ्या जागरितोपलब्धिरुपलब्धित्वात्स्वप्नोपलब्धिवदिति उभयोरंतरं स्वयमनु
भवता न च स्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुमपि चानुभवविरोधप्रसंगाज्जागरितप्रत्ययानां स्वतो निरालंबनतां व
क्तुमशक्नुवता स्वप्नप्रत्ययसाधर्म्याद्वक्तुमिष्यते न च यो यस्य स्वतो धर्मो न संभवति सोऽन्यस्य साधर्म्यात्तस्य संभविष्यति॥ न
ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्याच्छीतो भविष्यति दर्शितं तु वैधर्म्यं स्वप्नजागरितयोः॥ ॥छं॥ न भावोऽनुपलब्धे
ः॥ ॥यदप्युक्तं विनाप्यर्थेन ज्ञानवैचित्र्यं वासनावैचित्र्यादेवावकल्पत इति तत्प्रतिवक्तव्यमत्रोच्यते। न भावो वासन
नामुपपद्यते त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानामर्थोपलब्धिनिमित्ता हि प्रत्यर्थं नानारूपा वासना भवन्ति अनुपलभ्यमानेषु च
र्थेषु किंनिमित्ता विचित्रा वासना भवेयुरनादित्वेऽप्यन्धपरंपरान्यायेनाप्रतिष्ठैवानवस्था व्यवहारविलोपिनी स्यान्नाभिप्रायसि
द्धिः। यावप्यन्वयव्यतिरेकावर्थापलापिनोपन्यस्तौ वासनानिमित्तमेवेदं ज्ञानजातं नार्थनिमित्तमिति तावप्येवं सति प्रत्यु
क्तौ द्रष्टव्यौ। विनार्थोपलब्ध्या वासनानुत्पत्तेरपि च विनापि वासनाभिरर्थोपलब्ध्युपगमाद्विना त्वर्थोपलब्ध्या वासना
नोत्पत्त्यनभ्युपगमादर्थसद्भावमेवान्वयव्यतिरेकावपि प्रतिष्ठापयतः। अपि च वासना नाम संस्कारविशेषाः संस्काराश्च ना
श्रयमंतरेणावकल्पंते। एवं लोके दृष्टत्वान्न च तव वासनाश्रयः कश्चिदस्ति प्रमाणतोऽनुपलब्धेः॥ ॥छं॥ क्षणिकत्वाच्च॥
यदप्यालयविज्ञानं नाम वासनाश्रयत्वेन परिकल्पितं तदपि क्षणिकत्वाभ्युपगमादनवस्थितस्वरूपं सत्प्रवृत्तिविज्ञानव
न्न वासनानामधिकरणं भवितुमर्हति नहि कालत्रयसंबंधिन्येकस्मिन्नन्वयिन्यसति कूटस्थे वा सर्वार्थदर्शिनि देशकालनि

प्र०ना पि० ६

मिथ्यात्वाप्रसंगात्पुनरर्थेन स्मृतिप्रतिभासनादिप्रवाहसंस्कृतिप्रतिबिम्बरूपत्वे बालवयविज्ञानस्यासिद्धांतहानिरापि च विज्ञा
नवादे पि दृष्टि कथा स्वरूपमस्य सम्यग् न बाधानिवासार्थवादे क्षणिकत्वनिर्बंधनानिरूपणान्यज्ञावितान्यज्ञरोप्या।
दच सर्वं निराधारित्वमसाधितानीदृशमनुसंधेयान्यास्वमलोदावपि वो। नाशिकपक्षो निराकृतो बाह्यार्थवादिप
क्षाविज्ञानवादिपक्षश्च शून्यवादिपक्षः [illegible] मायाविप्रतिपत्तिरिति निराकरणायत्नादरः क्रियते। नन्वयं सर्वप्रमाण
प्रसिद्धो लोकव्यवहारः [illegible] तेप [illegible] तावकमार्गोप्रसिद्धः॥ ॥ठं॥ सर्वथाउपपन्न
च किंचिज्जनाय यथा यथा [illegible] तथा तथा उपपत्तिप्रकारं [illegible] तथा तथा [illegible] रूपवस्तु विदीर्यत एव। न क्वापि
दयात्राप्यतिप्रसंगात् [illegible] तथा प्रपंचो विनाशिकतंत्रस्य [illegible] पि च बाह्यार्थविज्ञानशून्यवादत्रयमितारतरविरु
द्धत्वं प्रतिपादितं [illegible] तत्र स्याद्वादवादिनोप्यत्र विरुद्धत्वे प्रसिद्धविरुद्धा युक्तिः प्रजाइतिसर्वा
यथनादरणीया यं [illegible] गतसमयः [illegible] स्वामेरित्यभिप्रायः॥ ॥निकस्मिन्नसंभवात् निरस्तः सुगतसमयं विवसन
समयइदानीं निरस्यन् तत्र मतविषयाः पदार्थाः संमताः जीवाजीवाश्रवसंवरनिर्जराबंधमोक्षा नाम सप्तरूपतत्त्वावबुध
तावर्थस्तु जीवाजीवाख्यौ यथा ये गतास्तत्र वन्नरांतर्गता नीत्यादिति मन्यते॥ तयारिमप्रपंचं एवमाद्वत पंचास्तिकाया नाम
जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकाय इति। सर्वेषामायथाम वा तत्र
तस्य सप्तभंगी विधितत्त्वसमयविकल्पितान् वर्णयंति सर्वत्र चेमे सप्तभंगी नयेन मन्यायमवतारयंति। स्यादस्त्येवास्ति १३५

स्यादवक्तव्यः स्यादस्ति च नास्ति च नास्ति च स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेत्यत्र वामवेक
च नित्यानित्यादि विधिमेसप्तभंगी नयैर्यथायं चत्रायस्याद्वादो नाम पक्षपरार्थोपरितिकृतपक्षस्मिन्नसंभवात्तत्र कस्मिन्
धर्मि त्रियुगाय सदसत्त्वादि विकल्पधर्मसमावेशः संभवति श्रीलालस्य यथाऽलसमयपदार्थानिर्धारितात्पतावेत्तावंतरूपात्स्थिति
तेलाथेवबासफात्मैवलात् यास्फरितरथाक्षितथाबास्फनंतथावस्थितनिर्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमवस्थाव
चानेकात्मकं वस्तु निर्धारितरूपाभवत्तानुत्पद्यमानं संशयज्ञानवत्प्रमाणं तद्विडंबर्दितिनिश्चितमिति निरंकुशं दर्श
नं कांतचं सर्वं वस्तु सुरुपति [illegible] न स्यानिर्वारराश्याप्यनित्यबुद्धाविशेषात् स्यादस्तित्वनास्तित्वादिविकल्पापपत्तादनिर्धार
णात्मकत्वेवस्यादवं निर्धारयितुनिर्धारणात्मनस्यात्मवस्त्वितास्याद्युपदर्शनास्तिनात्यवमतिकथं प्रमाणात्मतासंभ
र्धंव्यत्वः प्रमाणसमयप्रमा [illegible] इति यदि दोषिता इष्टापतेस्तु शंकया कथं वा तदभिप्रायानुसारिण॥ तदुपदिष्टार्थः निर्धारि
तरूपपूर्ववस्तुन एकांतिकफलाचनिश्चितात्मक्षिप्ततिसाधना तु श्रावयाबालाकाः नाकुलाः प्रवर्तते तद्वान्यथाश्रत
श्चानिर्धारिता इत्याश्रयशायाव्यानाम [illegible] आदेयवचनास्ताराक्ष्यापंचानाम स्तिकायानां पंचत्वसंख्यास्तित्वादि
विकल्पमाना स्यान्नावदेकस्मिन्नात्मपक्षांतरस्य स्मादित्यतो न्यूनसंख्यत्वमधिकसंख्यत्वं वाप्राप्नुयान्मोक्षपदार्थाश्रवस
य च संभवस्यवक्तव्यास्त्यनावस्तुत्वंतेवावक्तव्यास्तिविप्रतिपद्येदं चसमानाश्रुतादेवावधार्यतेतनांवधार्यतइतिवत्तया
तदवधारणफलं सम्यग्दर्शनमस्तित्वानास्तित्वादयवंतदिचरालमसम्यग्दर्शनमथ स्निगनास्तिवितिप्रलपन्मत्तानमत्तपदसाम्य

तासंज्ञानस्यतावद्वस्तुत्वेनैरात्म्यवादप्रसंगः वस्तुत्वेप्यात्मनोविकारादिदोषप्रसंगाद्यस्यपक्षस्याप्युपपत्तिरिति॥ ६॥ ॥
ऽत्तत्वावस्थितात्मानस्तत्पक्षनित्यत्वेदविशेषः॥ ॥अपिचान्यमतेक्तावस्त्रात्मविभाजीवपरिमाणस्यनित्यत्वमिच्छतांजैने।
सूक्ष्मसूर्वीयाख्यामध्यमश्योर्जीवपरिमाणयोर्नित्यत्वप्रसंगादनित्यत्वप्रसंगःस्यादिकृशरीरपरिमाण।तेवश्याज्ञाप
वितापवित्रशरीरःशीतरश्मिरथसंख्यस्यजीवपरिमाणस्यावस्थितत्वस्वीयाद्यथावस्थायारवस्थितपरिमाणएवजीवस्या
तूतलस्थाविशेषणसर्वदैवाणुर्मध्यमोजीवात्स्फपरंतात्मानशरीरपरिमाणोऽतत्स्मात्सोगतमतवदादेतमपिमतमस्त।
गतमित्यपाकृतव्यं॥ ॥छ॥९॥ ॥पक्षरमामंजस्यात्॥ इदानींकेवलाधिष्ठात्रीश्वरकारणवादःप्रतिषिध्य।
ते।तत्कथमवगम्यते।प्रकृतिस्त्वप्रतिज्ञाद्दृष्टांतासुपामधादनित्यत्वमयदेहदृशाप्रमस्यप्रकृतिरात्वनाधिष्ठात्वनावनवग।
मयत्स्वतावस्योश्वरस्यस्वयम्बुवाकार्येणप्रतिष्ठापितत्वाद्यदित्थंनरविवादःयेप्यश्वरकारणवादमात्रमिदंप्रतिषिध्यतन्व
वीतरविरोधभ्याद्ध्ज्ञानिर्मदारःस्वतन्त्रकावद्यात्यतदापद्यातंतस्मादप्रकृतिरधिष्ठाताकेवलंनिमित्तकारणमीश्वर
इत्यपपत्स्याद्वदांतविद्धितव्रह्मैकचप्रतिपक्षत्वाधद्वेनाऽत्रप्रतिषिध्यते॥सावेयंवस्त्रादेश्वरकल्पनानिकृष्टकार।
काकविज्ञावगंस्थायागस्यपाश्रयाःकल्पयंतिप्रधानपुरुषयोरधिष्ठाताकेवलंनिमित्तकारणमीश्वरइतारतरवि
लक्षणःप्रधानपुरुषाप्रस्रइतिमाद्दृश्वरास्तुमन्यंतकार्यकारणयोगविधिदुःखांताःपंचपदार्थाःपशुपतिनेश्वरेण १३७
पशुपाशविमोक्षायोपदिष्टाःपशुपतिरीश्वरोनिमित्तकारणमितितथावैशेषिकादयापिकथितकर्थविक्यप्रक्रिया

उसारस्यनिमित्तकारणमीश्वरंदर्शयंतितदेतदनुत्तरपक्षप्रमामंजस्यादितिपक्षरीश्वरस्यप्रधानपुरुषयोरधिष्ठातृत्वनज।
गत्कारणत्वेनोपपद्यतकस्मादसामंजस्याद्वितिउत्तरसामंजस्यंद्दीनमध्यमेतन्मतायनहिप्राणिनांतदात्विदंधतदीश्वरस्य
तारावृथादिरोधप्रसक्तस्मदादिवदेनीश्वरत्वंप्रमार्थेन॥प्राणिकर्मापेक्षत्वाद्दोषइतिचेन्नाकर्मेश्वरयायाप्रवर्त्तःप्रवर्त्तेयि।
त्वतरवत्तरतराश्रयादोषप्रसंगात्॥नादित्वादितिचेन्नावर्त्तमानकालवर्त्तीतद्यपिकालेपितरेतराश्रयदोषाविशेषाद्धपरं
परात्पायपातरपिप्रवर्त्तेजालक्षणादोषाःइतिन्यायविस्ममायानहिकश्चिद्दोषप्रयुक्तःस्वार्थेपरार्थेवाप्रवर्त्तमानादृश्य
तास्वार्थेप्रयुक्तपवत्तमावोजनःपरार्थेपिप्रवर्त्ततइत्येवमप्यसामंजस्यंस्वार्थवत्वादीश्वरस्यानीश्वरत्वप्रसंगात्पुरुषविशेषत्वा
त्फपगमाद्वीश्वरस्यपुरुषस्यावोदासीन्यात्स्फपगमादसामंजस्यं॥ ॥७॥ संबंधानुपपत्तेश्च॥ ॥उत्तरप्यसामंजस्याम
दानहिप्रधानपुरुषव्यतिरिक्तईश्वरांतरणसंबंधंप्रधानपुरुषावीश्वरितजतावसंयोगलक्षणःसंबंधःसंभवतिप्रधान।
पुरुषेश्वराणांसर्वगतत्वान्निरवयवत्वाच्चनापिसमवायलक्षणआश्रयाश्रितभावानिरूपणान्नाप्यन्यःकश्चित्कार्यगम्यःसंबंधः
शक्यतकल्पयितुंकार्यकारणभावस्यैवाद्याप्यसिद्धत्वात्॥ब्रह्मवादिनांकथमितिचेन्नतस्यतादात्म्यलक्षणसंबंधोपपत्त
त्तरपिचागमबलेनब्रह्मवादीकारणादिस्वरूपंनिरूपयतिनावश्यंतस्ययथादृष्टंसर्वमभ्युपगंतव्यंपरस्यतुदृष्टांतबालेन॥
कारणादिस्वरूपंनिरूपयतायथादृष्टमेवसर्वमभ्युपगंतव्यमित्ययमस्यविशेषः॥परस्यापिसर्वज्ञप्रणीतागमसद्भावात्सम
नयागमबलमितिचेन्नइतरेतराश्रयप्रसंगादागमप्रत्ययात्सर्वज्ञसिद्धिःसर्वज्ञप्रत्ययाद्यागमसिद्धिरिति।तस्मादनुपपन्नासां॥

सुदेवो नाम परमात्मोच्यते। संकर्षणो नाम जीवः। प्रद्युम्नो नाम मनः। अनिरुद्धो नामाहंकारः। तेषां वासुदेवः परा प्रकृतिरितरे सं
कर्षणादयः कार्यमिति। तमित्थंभूतं भगवंतमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवंतमेव प्रतिपद्यत।
इति। तत्र यत्तावदुच्यते। योसौ नारायणः परोऽव्यक्तात्प्रसिद्धः परमात्मा सर्वात्मा स आत्मनात्मानमनेकधा व्यूह्यावस्थित इति तन्नि
राक्रियते। स एकधा भवति त्रिधा भवतीत्यादिश्रुतिभ्यः परमात्मनोनेकधाभावस्याधिगतत्वात्। यदपि तस्य भगवतोभिगमनादिलक्ष
णमाराधनमजस्रमनन्यचित्ततयाभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्। यत्पुनरिदमुच्यते।
वासुदेवात्संकर्षण उत्पद्यते संकर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इत्यत्र ब्रूमः॥ न वासुदेवसंज्ञकात्परमात्मनः संकर्षण।
संज्ञकस्य जीवस्योत्पत्तिः संभवत्यनित्यत्वादिदोषप्रसंगात्। उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरंस्ततश्च नैवास्य।
नित्यत्वेन भगवत्प्राप्तिर्मोक्षः स्यात्कारणप्राप्तौ कार्यस्य प्रविलयप्रसंगात्। प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिं नात्माश्रुतेर्नित्यत्वा
च्च ताभ्य इति तस्मादसंगतैषा कल्पना॥ ॥काधप न च कर्तुः करणं॥ ॥इतश्चासंगतैषा कल्पना यस्मान्न हि लोके क
र्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते वर्णयंति च भागवताः कर्तुर्जीवात्संकर्षणसंज्ञकात्करणस्य मनसः प्रद्युम्नसंज्ञक
स्योत्पत्तिं कर्तृजाच्च तस्मादनिरुद्धसंज्ञकस्याहंकारस्योत्पत्तिमिति न चैतद्दृष्टांतमंतरेणाध्यवसातुं शक्नुमो न चैवंभूतां श्रुति
मुपलभामहे॥ ॥कं॥ विज्ञानादिभावे वा तदप्रतिषेधः॥ ॥अथापि स्यान्नैवैते संकर्षणादयो जीवादिभावेनाभिप्रेयंत १२७
किं तर्हीश्वरा एवैते सर्वे ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वर्यधर्मैरन्विता अभ्युपगम्यंते॥ वासुदेवा एवैते सर्वे नि

र्दोषा निरधिष्ठाना निरवद्याश्चेति। तस्मान्नायं यथावर्णित उत्पत्त्यसंभवो दोषः प्राप्नोतीति अत्रोच्यते एवमपि तदप्रतिषेध उत्प।
त्त्यसंभवस्याप्रतिषेधः प्राप्नोत्येवायमुत्पत्त्यसंभवो दोषः प्रकारांतरेणेत्यभिप्रायः कथं यदि तावदयमभिप्रायः परस्परभिन्ना ए
वैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति ततोनेकेश्वरकल्पनानर्थक्यमेकेनैवेश्वरेणेश्वर
कार्यसिद्धेः सिद्धांतहानिश्च भगवानेवैको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्। अथायमभिप्रायः एकस्यैव भगवत एते च
त्वारो व्यूहास्तुल्यधर्माण इति तथापि तदवस्थ एवोत्पत्त्यसंभवः। न हि वासुदेवात्संकर्षणस्योत्पत्तिः संभवति संकर्षणाच्च प्रद्यु
म्नस्य प्रद्युम्नाच्चानिरुद्धस्यातिशयाभावात् भवितव्यं हि कार्यकारणयोरतिशयेन यथा मृद्घटयोः। नह्यसत्यतिशये कार्यकार
णमित्यवकल्पते न च पंचरात्रसिद्धांतिभिर्वासुदेवादिष्वेकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोभ्युपगम्य
ते वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यंते न चैते भगवद्व्यूहाश्चतुःसंख्यायामेवावतिष्ठेरन्ब्रह्मादिस्तंबपर्यंतस्य
समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात्॥ ॥कं॥ विप्रतिषेधाच्च॥ ॥विप्रतिषेधश्चास्मिन्शास्त्रे बहुविध उपलभ्यते
गुणगुणित्वकल्पनादिलक्षणः ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणा आत्मान एवैते भगवंतो वासुदेवा इत्यादिदर्शना
त् वेदप्रतिषेधश्च भवति चतुर्षु वेदेषु परं श्रेयोलब्ध्वा शांडिल्य इदं शास्त्रमधीतवानित्यादिवेदनिंदादर्शनात्तस्मादसंगतै
षा कल्पनेति सिद्धं॥ ॥इति शारीरकमीमांसाभाष्ये शंकरभगवत्पादकृतौ द्वितीयस्याध्यायस्य द्वितीयः पादः॥ ॥छ
॥छ॥ ॥शुभंभवतु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ

सा ६ क

शारीरभाष्य अभ्या युक्तम् पत्र १४०

१४०